## शास्त्री-षष्ठसत्रार्ध-षष्ठपत्रम्

।।निरुक्तम्।।

**प्रश्नः१** **अतिस्तुतयः कुत्राचक्षते?**

उत्तरम् त्रयोदशाध्याये।

**प्रश्नः२** **त्वमग्नेद्युभिस्त्वमाशुशुक्षणिरित्यतिस्तुतिः कुत्र?**

उत्तरम् ऋग्वेदे संख्या २.५-२७-२ गृत्समददृष्टं।

**प्रश्नः३** **यदित इन्द्रशतं दिवः शतं भूमयः प्रतिमानस्युरिति कस्याति स्तुतिः?**

उत्तरम् इन्द्रस्य।

**प्रश्नः४** **'नेन्द्रं देवममंसत' एषातिस्तुतिः?**

उत्तरम् आदित्यरश्मीनाम्।

**प्रश्नः५** **कतमानि वाक्चत्वारि पदानि, आर्षमते।**

उत्तरम् ओङ्कारो महात्याहृतयश्चेत्यार्षम्।

**प्रश्नः६** **नामाख्याते चोपसर्गनिपाताश्चेति कस्यमतम्।**

उत्तरम् वैयाकरणानाम्।

**प्रश्नः७** **तुरीयं वाचः के वदन्ति?**

उत्तरम् मनुष्याः।

**प्रश्नः८** **चत्वारि शृङ्गेति क एते सन्ति?**

उत्तरम् वेदाः।

**प्रश्नः९** **मन्त्रः कल्पोब्राह्मणं चतुर्थी व्यावहारिकीति केषां मान्यता?**

उत्तरम् याज्ञिकानाम्।

**प्रश्नः१०** **सप्तछन्दांसि के?**

उत्तरम् यज्ञात्मकस्याग्नेः हस्ताः।

**प्रश्नः११** **ऋचोयजूँषि सामानि चतुर्थी व्यावहारिकीति के समामनन्ति?**

उत्तरम् नैरुक्ताः।

**प्रश्नः१२** **पारोवर्यवित्सुखलु वेदितृषु कः प्रशस्यो भवति?**

उत्तरम् भूयोविद्यः।

**प्रश्नः१३** **श्रुतिमतिबुद्धिशब्देन किमाख्यायते?**

उत्तरम् शास्त्रविज्ञानप्रभवाविद्या।

**प्रश्नः१४ तादृभाव्यम् इति पदस्य कोऽर्थः?**

उत्तरम् सायुज्यम्।

**प्रश्नः१५ अनुभवत्यनुभवतीति द्विरुक्तिः कथं?**

उत्तरम् इयं ग्रन्थसमाप्तिसूचिका भवति।

**प्रश्नः१६ ब्राह्मणा इत्यस्य कोऽर्थः?**

उत्तरम् अधिगतमन्त्रार्थतत्त्वाः।

**प्रश्नः१७ मन्त्रार्थचिन्ताभ्यूहितं किं प्रायच्छन्?**

उत्तरम् एतत् तर्कशास्त्रं ऋषिं प्रायच्छन् येन सर्वतो भावेन शक्यन्तेऽभ्यूहितुं मन्त्रार्थाः तस्मै।

**प्रश्नः१८ मन्त्रार्थचिन्ताभ्यूहोऽभ्यूह्लोऽपि श्रुतितोऽपि तर्कतोऽपि वा?**

उत्तरम् क्वचिच्छुतितोऽपि तर्कतश्च।

**प्रश्नः१९ समासते इत्यस्यार्थः कः?**

उत्तरम् अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनम्।

**प्रश्नः२० व्योमन् इति किम्।**

उत्तरम् विविधं हि शब्दजातमस्मिन्नोतप्रोतञ्चेति व्योम, तस्मिन् तिसृषु मात्रासु अकार, उकार, मकार, लक्षणासूपशान्तासु यदव शिष्यते तदक्षरं परम व्योमन् इति।

**प्रश्नः२१ सर्वे देवाः कुत्र निषेदुः?**

उत्तरम् प्रणवस्य सर्वमात्रात्मकत्वात् ब्रह्माधिष्ठानत्वाद्वा सर्वदेवानां ब्रह्मणि निवासः।

**शास्त्री-षष्ठसत्रार्ध-षष्ठपत्रम्**

।।पारस्करगृह्यसूत्रम्।।

**प्रश्नः१ पारस्करगृह्यसूत्रे कियन्ति काण्डानि।**

उत्तरम् त्रीणि।

**प्रश्नः२ तृतीयकाण्डस्य नवम्यां कण्डिकायां कः विषयः निगदितः?**

उत्तरम् वृषोत्सर्गः।

**प्रश्नः३ वृषोत्सर्गयज्ञः कीदृक्कर्म?**

उत्तरम् काम्यकर्मेति।

**प्रश्नः४ वृषोत्सर्गकालः कः?**

उत्तरम् कार्त्तिक्यां पौर्णमास्यां रेवत्यां वास्वयुजस्य चैत्र्यामाश्वयुज्यां वा कर्त्तव्यकालः।

**प्रश्नः४ एष वृषोत्सर्गविधिः कस्मादाचर्यते?**

उत्तरम् स्वर्गादिकामस्य औपासनाग्नौ साग्निकेन क्रियते।

**प्रश्नः६ उदककर्म किमुच्यते?**

उत्तरम् उदकेनकर्मक्रिया, अञ्जलिदानमिति।

**प्रश्नः७ अद्विवर्षे प्रेते मातापित्रौराशौचं कियत्कालिकं?**

उत्तरम् एक रात्रं त्रिरात्रं वा।

**प्रश्नः८ इतरेषां सजातीयानां कालः?**

उत्तरम् शौचमेवेतरेषां, स्नानादिभिरेव शुद्धिः।

**प्रश्नः९ प्राचीनावीतिनः के?**

उत्तरम् प्राचीनावीतं विद्यते येषां ते प्राचीनावीतिनः कृतापसव्या इत्यर्थः।

**प्रश्नः१० अवनेजनप्रत्यवनेजने इत्यस्य कोऽर्थः?**

उत्तरम् श्राद्धेपिण्डदानार्थमास्तृत कुशस्य जलेन सेचनं, ततः पिण्डदानं पुनः जलेनसेचनं प्रत्यवनेजनमिति।

**प्रश्नः११ चतुर्थस्य निवृत्तिः इत्यस्य कोऽर्थः।**

उत्तरम् पितापितामहप्रपितामहेभ्यो हि पिण्डदानं, सपिण्डीकरणे कृते सति चतुर्थस्य वृद्धप्रपितामहस्य निवृत्तिः, 'त्रिषु पिण्डः प्रवर्त्तते' इति स्मृतिः।

**प्रश्नः१२ नद्यन्तरे नावं कारयेन्नवा इत्यस्य कोऽर्थः?**

उत्तरम् एकादशेह्नि नद्यन्तरे गोपशुः आलभेत नवा आलभेत।

**प्रश्नः१३ निर्ऋति केन यज्ञेन यजेत?**

उत्तरम् पाक यज्ञेन।

**प्रश्नः१४ सभा समितिश्च कस्य दुहितरौ?**

उत्तरम् प्रजापतेः।

**प्रश्नः१५ अथातो रथारोहणं कुत्र प्राप्यते?**

उत्तरम् चतुर्दशीकण्डिकायाम्।

**प्रश्नः१६ हस्त्यारोहण मन्त्रः कः?**

उत्तरम् हस्तिनमभिमृशन्- ''हस्तियशसमसि हस्तिवर्चसमसि स्वस्ति मा सम्पारय'' इति।

**प्रश्नः१७ अनिराकरणं पदस्य कोऽर्थः?**

उत्तरम् अविस्मरणं कर्म, अधीतविद्याया येन परित्यागो न भवेत्।

**प्रश्नः१८ अथातोऽधीत्याधीत्येति कुत्र प्राप्यते?**

उत्तरम् षोडशी कण्डिकायाम्।

**प्रश्नः१९ औरसाः के वर्णाः?**

उत्तरम् हकाररहिताः वर्गपञ्चमान्तस्थाः।

**प्रश्नः२० दन्त्याः के?**

उत्तरम् दन्तेषु भवाः, लृतु लसानां दन्ताः।